GOVT OF KARNATAKA

Department of School Education. (Pre-University)

# REVISED QUESTION BANK-2024-25.

## SUB: SANSKRIT (09). ॥ संस्कृतम् ॥

## CLASS: I P U C.

# COMMITTEE

## Co-ordinator: Smt. JAYASHREE S. P

Govt.P U College 18th cross Malleshwaram, Bangaluru.

## Members: 1. CHIKKARANGAPPA R

Govt.P U College T. Dasarahalli, Bangaluru North.

## 2. Dr.MAHESH KAKATHKAR.

Govt.P U College Shringeri, Chickmagalur District.

## 3. GANESH BHAT.

Govt.Hanumant Benne P U College Nellikeri, Kumta. Uttara Kannada District.

## 4. Dr. SURYANARAYANA HEGDE.

Govt.M. H. N P U College Kolgibees, Sirsi. Uttara Kannada District.

# 1. द्वे विद्ये वेदितव्ये ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. द्वे विद्ये के ?

अ. लौकिकी अलौकिकी च । आ.परा अपरा च । इ.वैदिकी अवैदिकी च ।ई.नवीना अनवीना च ।

2. भुवनस्य गोप्ता कः ?

अ. ब्रह्मा । आ.यक्षः । इ.गन्धर्वः । ई. किन्नरः ।

3. अङ्गीः कस्मै ब्रह्मविद्यां प्रोक्तवान् ?

अ.कश्यपाय । आ. गौतमाय । इ. वसिष्ठाय । ई. सत्यवहाय ।

4. महाशालः कः?

अ. शौनकः । आ. पावकः । इ. धावकः । ई. शावकः ।

5. वेदाङ्गानि कति ?

अ. चत्वारि । आ. षट् । इ. अष्ट । ई. दश ।

6. अग्राह्यं किम् ?

अ. नगरम् । आ. अक्षरम् । इ. पत्रम् । ई. पुष्पम् ।

7. विश्वं कस्मात् सम्भवति ?

अ. गृहात् । आ. कोष्टकात् । इ. अक्षरात् । ई. वरुणात् ।

8.अपराविद्यायां -------- न अन्तर्भवति।

अ. शिक्षा । आ. व्याकरणम् । इ. योगः । ई. छन्दः ।

9.अक्षरात् विश्वं कथं सम्भवति इत्युक्ते।

अ. यथा जले मीनाः सम्भवन्ति तथा । आ. यथा वृक्षे फलानि सम्भवन्ति तथा ।

इ. यथा पृथिव्याम् ओषधयः सम्भवन्ति तथा । ई.यथा पाकशालायाम् अन्नं सम्भवति तथा ।

10.ब्रह्मविद्यापरम्परा एवम् अस्ति।

अ. ब्रह्मा , अथर्वा , अङ्गीः , सत्यवहः , अङ्गिराः , शौनकः।

आ. अङ्गीः, अथर्वा , ब्रह्मा , सत्यवहः , अङ्गिराः , शौनकः ।

इ.शौनकः , अथर्वा , अङ्गीः , सत्यवहः , अङ्गिराः , ब्रह्मा ।

ई.अङ्गीः , सत्यवहः , अङ्गिराः , शौनकः, ब्रह्मा , अथर्वा ।

II. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. ब्रह्मविद्यायाः परम्परां लिखत ।

2.अपरायां विद्यायां के अन्तर्भवन्ति ?

3.ब्रह्मणः स्वरूपं वर्णयत ।

4. विश्वस्य उत्पत्तिःकथमिति सोदाहरणं लिखत।

IV. पाठनाम उल्लिख्य, 'कः कं प्रति अवदत्' इति संस्कृतभाषया उत्तरं लिखत ।

1. सर्वमिदं विज्ञातं भवतीति ।

2. परा चैवापरा च ।

3.यद्भूतयोनिं परिपश्यन्ति धीराः ।

V.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. ब्रह्मा देवानां ................ सम्बभूव ।

2. सर्वविद्याप्रतिष्ठाम् ................ ज्येष्ठपुत्राय प्राह ।

3. शौनको ह वै महाशालोऽङ्गिरसं ................ उपसन्नः पप्रच्छ ।

4. यथा पृथिव्याम् ................ सम्भवन्ति ।

| |
|---|
| ओषधयः, प्रथमः, विधिवत्, अथर्वाय, अक्षरम् |

VI. संयोजयत ।

| क | ख |
|---|---|
| अथर्वा | केशलोमानि |
| पुरुषात् | सुसूक्ष्मम् |
| सत्यवहः | ज्येष्ठपुत्रः |
| अक्षरम् | अपरा |
| शिक्षा | भारद्वाजः |
| | शौनकः |

# 2. आदर्शगुणाः ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. रामः कस्मिन् वंशे जातः ?

अ. चन्द्रवंशे। आ. इक्ष्वाकुवंशे। इ. भार्गववंशे । ई.भारद्वाजवंशे ।

2. शत्रुनिबर्हणः कः ?

अ. कृष्णः । आ.गोविन्दः । इ.श्रीरामः । ई. गणेशः ।

3. त्यागे रामः केन समः ?

अ. धनदेन । आ. वरदेन । इ. इन्द्रेण । ई.वरुणेन ।

4. रामः कान् स्वजनवत् पश्यति ?

अ. शत्रून्। आ. शिष्यान् । इ. चोरान् । ई.पौरान् ।

5. रामः कान् अविजित्य सङ्ग्रामात् न निवर्तते ?

अ. शत्रून् । आ. बन्धून् । इ. शिष्यान् । ई. वानरान् ।

6. वासवः केषां राजा ?

अ. जनानां। आ.राक्षसानां । इ. देवानां । ई.नागानाम् ।

7.कम्बुग्रीवः इति पदस्य अर्थः।-----

अ.यस्य ग्रीवः कम्पते सः। आ.यस्य ग्रीवः अम्बुयुक्तः वर्तते सः।

इ.यस्य ग्रीवः शङ्खः इव वर्तते सः। ई.यस्य ग्रीवः कमलम् इव वर्तते सः।

8.अदीनात्मा इति पदं रामः कीदृशः इति सूचयति?

अ .रामः सर्वत्र याचनां करोति । आ .रामः कस्यापि समीपे याचनां न करोति।

इ.रामः दीनानां समीपे याचनां करोति। ई.रामः दीनानाम् आत्मा ।

9. i.रामः त्यागे धनदेन समः।

ii.रामः बुद्ध्या मानवेन तुल्यः।

उपरि वाक्यद्वयं दत्तम् अस्ति। तत्र किं सत्यम् ? किम् असत्यम् इति लिखत ।

अ. i.सत्यम् , ii.असत्यम् । आ. i.असत्यम् , ii.सत्यम् ।

इ. i. ii. उभयमपि सत्यम् । ई. i. ii. उभयमपि असत्यम् ।

II. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1.पाठानुसारेण श्रीरामस्य गुणान् सङ्गृह्य लिखत ।

III.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. धर्मज्ञः सत्यसन्धश्च .................... च हिते रतः ।

2. सङ्ग्रामात् पुनरागत्य कुञ्जरेण ....................वा ।

3. रामो विग्रहवान् .................... ।

| | | | |
|---|---|---|---|
| रथेन, | धर्मः, | सुग्रीवः, | प्रजानां |

IV. पाठनाम उल्लिख्य,श्लोकानाम् अनुवादं कन्नडभाषया, आङ्ग्लभाषया वा कुरुत ।

1. धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥3॥

2. रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥4॥

3. सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥5॥

4. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।

बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥8॥

5. मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।

प्रियवादी च भूतानां सत्यवादी च राघवः ॥9॥

6. स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः ।

सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः ॥13॥

7. रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।

राजा सर्वस्य लोकस्य देवानामिव वासवः ॥15॥

V. संयोजयत ।

| क | ख |
|---|---|
| शत्रुनिबर्हणः | वसुधा |
| क्षमागुणः | रामः |
| वासवः | लक्ष्मणः |
| सौमित्रिः | देवेन्द्रः |
| आदिकविः | भरतः |
| | वाल्मिकिः |

# 3. विवादः विनाशाय ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. कपिञ्जलः कुत्र वसति स्म ?

अ.गृहे । आ.कोटरे । इ.प्रकोष्ठे । ई. पर्वते ।

2. चटकस्य नाम किम् ?

अ. चित्रग्रीवः । आ. तीक्ष्णदंष्ट्रः। इ. कपिञ्जलः । ई. सुपर्णः ।

3. कपिञ्जलः किमर्थम् अन्यं देशं गतः ?

अ. विहारार्थम् । आ. दर्शनार्थम् । इ. स्नानार्थम् । ई. प्राणयात्रार्थम् ।

4. शीघ्रगः कः ?

अ. शशकः । आ. चटकः । इ. वानरः । ई. बकः ।

5. शश - कपिञ्जलयोः विवादनिर्णायकः कः ?

अ. कुञ्जरः । आ. अरण्यमार्जालः । इ. श्रृगालः। ई. वायसः ।

6."अहो! किमद्य कपिञ्जलो नायातः" इति वायसः चिन्तयति। एतेन ज्ञायते यत्।

अ.वायसस्य कपिञ्जलस्य च वैरम् आसीत्। आ. वायसस्य कपिञ्जलस्य च मैत्री आसीत्।

इ. वायसस्य कपिञ्जलस्य च कलहः आसीत्। ई. वायसस्य कपिञ्जलस्य च मैत्री न आसीत्।

7.विवादः विनाशाय इति कथायाम् एतत् पात्रम् नास्ति।

अ. शीघ्रगः । आ. कपिञ्जलः ।इ.तीक्ष्णदंष्ट्रः । ई.करटकः ।

8.मार्जारः धर्मोपदेशं करोति। तदा सः धर्मस्य सारं संक्षेपेण वदन् एवं वदति।

अ. परापकारेण पुण्यं लभ्यते । आ. परोपकारेण पुण्यं लभ्यते ।

इ. परोपकारेण पापं लभ्यते । ई.पापेन पुण्यं लभ्यते ।

9.मार्जालः एतदर्थं धर्मोपदेशनं करोति।

अ.मोक्षप्राप्त्यर्थम् । आ.ज्ञानवर्धनार्थम् ।

इ.शशकपिञ्जलयोः उपकारार्थम् । ई.शश-कपिञ्जलौ वञ्चयितुम् ।

II. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. वायसः सोद्वेगं किम् अचिन्तयत् ?

2. शश-कपिञ्जलयोः वासस्थानविषयकः कलहः कः?

3.धर्मस्य स्वरूपं संक्षेपेण लिखत।

4. विवादः विनाशाय इति पाठस्य शीर्षिकां समर्थयत।

III.दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1.मार्जारस्य धर्मोपदेशं सविस्तरं लिखत।

2.मार्जारः शशकपिञ्जलौ कथं व्यापादयति ? इति वर्णयत।

IV. पाठनाम उल्लिख्य,'कः कं प्रति अवदत्' इति संस्कृतभाषया उत्तरं लिखत।

1. मया द्रष्टव्योऽयं न्यायः ।

2. ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति ।

3. यो हीनवादी स ते भक्ष्यः ।

4. अहिंसैव धर्ममार्गः ।

5. तन्नाहं भक्षयिष्यामि ।

V.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. केनापि ................ बद्धः ।

2. परोपकारः पुण्याय ................ परपीडनम् ।

3. श्रुतेः परमार्थं ................ न जानन्ति ।

4. ................. अहानि अतिक्रान्तानि ।

| |
|---|
| बहूनि, मूर्खाः, कोटरे , पाशेन, पापाय |

VI. संयोजयत ।

| क | ख |
|---|---|
| पञ्चतन्त्रम् | अरण्यमार्जालः |
| कपिञ्जलः | विष्णुशर्मा |
| धर्मसंग्रहः | शशकः |
| अहिंसापूर्वकः | कर्तव्यः |
| तीक्ष्णदंष्ट्रः | धर्मः |
| | चटकः |

# 4. सत्त्वपरीक्षा ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1.भीमसेनः कं स्वभ्राता इति वदति ?

अ. हनूमन्तम् । आ. अङ्गदम् । इ. अर्जुनम् । ई. सुग्रीवम् ।

2. भीमसेनः केन सह तुल्यः?

अ. इन्द्रस्य तेजसा । आ. हनूमतः तेजसा । इ. वरुणस्य तेजसा । ई. सोमस्य तेजसा ।

3. भीमसेनः केन पाणिना पुच्छं जग्राह ?

अ. दक्षिणेन । आ. उत्तरेण । इ. वामेन । ई. पूर्वेण ।

4. हनूमतः पिता कः?

अ. केसरी । आ. नीलः । इ. दधिमुखः। ई. सुग्रीवः।

5.जगदायुः कः?

अ. इन्द्रः । आ. अग्निः । इ. वायुः । ई. यमः ।

6. मकरालयः कः?

अ.आकाशः। आ. वायुः । इ. स्वर्गः । ई. सागरः ।

7.रामायणेऽति विख्यातः शूरो वानरपुङ्गवः एषः अस्ति।

अ. हनूमान् । आ.दशरथः। इ. जनकमहाराजः । ई.सुमन्त्रः ।

8.मया धन्यतरोनास्ति इति भीमसेनःवदति। सः किमर्थं तथा वदति इत्युक्ते-----।

अ. सः सौगन्धिकापुष्पम् आनीतवान् । आ.सः वानरस्य निग्रहे शक्तः अभवत् ।

इ. सः हनूमन्तं दृष्टवान्। ई. सः बाहुबलेन दर्पितः आसीत् ।

9.भीमसेनः केन उन्मत्तः आसीत् इति हनूमान् चिन्तयति?

अ. बाहुबलेन । आ.धनमदेन । इ.अधिकारेण । ई.यौवनमदेन ।

II.द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1.भीमसेनः हनूमतः विषये किं वदति ?

2.भीमसेनः आत्मानं कथं परिचाययति ?

3.भीमसेनः किमर्थं हनूमतः क्षमां याचति ?

4. हनूमान् स्वपरिचयं कथं करोति ?

5.भीमसेनः किमर्थं व्रीडानत-आननः जातः?

III. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1.सत्त्वपरीक्षा इति पाठानुसारेण भीमसेनस्य पात्रचित्रणं कुरुत ।

2. हनूमान् भीमस्य सत्त्वपरीक्षां कथं कृतवान् इति स्ववाक्यैः विशदयत ।

3. सत्त्वपरीक्षा इति पाठानुसारेण हनूमद्भीमयोः संवादमधिकृत्य लिखत ।

IV.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. भ्राता मम ................ बुद्धिसत्त्वबलान्वितः ।

2.बले पराक्रमे युद्धे ................ तव निग्रहे ।

3.प्रसीद कपिशार्दूल ................ क्षम्यतां मम ।

4. रूपमप्रतिमं वीर ! ................ निरीक्षितुम् ।

5.तद्रूपं दर्शयामास यद्वै ................ ।

| |
|---|
| तदिच्छामि, सागरलङ्घने, जग्राह , गुणश्लाघ्यो, शक्तोऽहं, दुरुक्तम् |

V. पाठनाम उल्लिख्य, श्लोकानाम् अनुवादं कन्नडभाषया, आङ्ग्लभाषया वा कुरुत।

1. भ्राता मम गुणश्लाघ्यो बुद्धिसत्त्वबलान्वितः ।
रामायणेऽतिविख्यातः शूरो वानरपुङ्गवः ॥2॥

2.उत्तिष्ठ देहि मे मार्गं पश्य वा मेऽद्य पौरुषम् ।
मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ॥4॥

3.उच्चिक्षेप पुनर्दोर्भ्यामिन्द्रायुधमिवोच्छ्रितम् ।
नोद्धर्तुमशकद् भीमो दोर्भ्यामपि महाबलः ॥8॥

4. अहं केसरिणः क्षेत्रे वायुना जगदायुषा ।

जातः कमलपत्राक्ष हनूमन्नाम वानरः ॥13॥

5. यत्त्वेतदासीत् प्लवतः सागरं मकरालयम् ।

रुपमप्रतिमं वीर ! तदिच्छामि निरीक्षितुम् ॥16॥

6. विसिष्मिये तदा भीमो जहृषे च पुनः पुनः।

तमर्कमिव तेजोभिः सौवर्णमिव पर्वतम् ॥18॥

VI. संयोजयत ।

| क | ख |
|---|---|
| कौन्तेयः | सागरः |
| वानरपुङ्गवः | भीमसेनः |
| जगदायुः | पापरहितः |
| मकरालयः | कपिश्रेष्ठः |
| अनघः | वायुः |
| | आकाशः |

# 5. महर्षिवचनपालनम् ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. दशरथः कस्य सपर्यां करोति ?

अ. वसिष्ठस्य । आ.विश्वामित्रस्य । इ.भरद्वाजस्य । ई.अगस्त्यस्य ।

2. शरासनमित्रः कः?

अ.रामः । आ.अर्जुनः । इ.लक्ष्मणः । ई.दशरथः।

3. सुकेतुः कः ?

अ. गन्धर्वः । आ.किन्नरः । इ.यक्षः । ई. सिद्धः।

4. वृद्धश्रवाः कः?

अ. इन्द्रः। आ.चन्द्रः। इ. सेवकः । ई. विश्वामित्रः ।

5. मारीचः कस्य शापात् कौणपताम् अवाप ?

अ. विश्वामित्रस्य । आ. वसिष्ठस्य । इ.व्यासस्य । ई.कुम्भसम्भवस्य ।

6. पुरुषादिनी का ?

अ.ताटका । आ.शूर्पणखा । इ. त्रिजटा । ई.त्रिजिह्वा ।

7. विरोचनस्य पुत्री का ?

अ.वैष्णवी । आ. विभावरी । इ.मायाविनी । ई.मन्थरा ।

8.एताभ्यां द्वाभ्यां विद्याभ्यां बलवृद्धिः क्षुत्पिपासाभावः शत्रोः बलस्य ह्रासःइत्यादिकं भवति ।

अ.सत्त्वा अतिसत्त्वा च । आ.बला अतिबला च। इ.स्थिरा अस्थिरा च। ई.शुद्धा अशुद्धा च ।

9.ताटकायाः वर्णने ' यमकिंकराः मार्गे क्रीडन्ति स्म ' इति वाक्यस्य आशयः --------- ।

अ.ते यमस्य आज्ञां न पालयन्ति स्म। आ.भूलोके कस्यापि मरणं न भवति स्म।

इ.ताटका एव सर्वेषां प्राणान् हरति स्म। ई.तेषां क्रीडायाम् एव अतीव आसक्तिः।

10. ताटका स्वप्राणान् रामबाणस्य वीरपाणम् अकल्पयत् इत्युक्ते ---------- ।

अ.ताटका रामबाणेन न मारिता । आ.ताटका रामबाणाय जलम् अर्पितवती ।

इ. ताटका रामबाणेन मारिता । ई.ताटका वीरपाणं कृतवती ।

II. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. विश्वामित्रः दशरथस्य आस्थानम् आगत्य किं निवेदयति? तदा दशरथः कीदृशं निर्णयं स्वीकरोति?
2. ताटकासहांरसमये श्रीरामस्य विचिकित्सा का? तां विश्वामित्रः कथं निवारयामास ?
3. सुन्दवधूवृत्तान्तं (ताटकावृत्तान्तं) पाठाधारेण विशदीकुरुत ।

III.पाठनाम उल्लिख्य,'कः कं प्रति अवदत्'इति संस्कृतभाषया उत्तरं लिखत।

1. कृतावभृथो भवितुमभिलषामि ।
2. निर्यातु रामः सह लक्ष्मणेन ।
3. बलेन तपसा लब्धे बलेत्यतिबलेति च ।
4. मारीचनीचं जनयाम्बभूव ।
5. व्यापादनीया त्वयेति ।

IV.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. तत्र सत्रं परित्रातुं .............. महामुनिः ।
2. दशरथः .............. कुशिकसुतमनोरथमेव पूरयामास ।
3.आश्रुतः श्रुतवृत्तेन तेन ............ ।
4.स्वप्राणान् ............ वीरपाणमकल्पयत् ।

| |
|---|
| रामबाणस्य, विश्वामित्रो , सुतप्रदानेन , यातुधानः, सुन्दप्रियावधः |

V. संयोजयत ।

| क | ख |
| --- | --- |
| अतिबला | कुम्भसम्भवः |
| श्रीरामः | विद्या |
| विश्वामित्रः | काकुत्स्थः |
| अगस्त्यः | गाधिनन्दनः |
| | सुन्दः |

# 6. कन्येयं कुलजीवितम् ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. पर्वतराजस्य पुत्री का ?

अ. पार्वती । आ. भागीरथी । इ.धरित्री । ई.देवपुत्री ।

2 . मेना कस्य पत्नी ?

अ. देवराजस्य । आ. समुद्रराजस्य । इ. पर्वतराजस्य । ई.यक्षराजस्य ।

3. उदाहरणवस्तुषु अग्रण्यः कः ?

अ.अगस्त्यः । आ. अङ्गिरसः । इ.वसिष्ठः। ई.भारद्वाजः ।

4. अधोमुखी पार्वती किं गणयामास ?

अ. लीलाचूतपत्राणि । आ.लीलाशोकपत्राणि । इ.लीलामल्लिकापत्राणि । ई.लीलाकमलपत्राणि ।

5. जगतः पिता कः ?

अ. इन्द्रः । आ. ईशः । इ.वरुणः । ई. सोमः ।

6." कन्येयं कुलजीवितम् " इति पाठानुसारेण एतत् कथनं समीचीनं वर्तते।

अ.उमा वरः , हिमालयः याचितारः,सप्तर्षयः दाता,शम्भुः वधूः।

आ. उमा दाता,हिमालयः वधूः,सप्तर्षयः वरः,शम्भुः याचितारः।

इ.उमा वधूः,हिमालयः दाता,सप्तर्षयः याचितारः,शम्भुः वरः।

ई.उमा याचितारः,हिमालयः वरः,सप्तर्षयः वधूः,शम्भुः दाता।

7.अधोमुखी पार्वती लीलाकमलपत्राणि गणयामास ।अत्र पार्वत्याः अयं भावः सूचितः अस्ति।

अ. लज्जा । आ.कोपः । इ.दुःखम् । ई.ग्लानिः ।

8. ' प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ' इति वाक्यस्य आशयः वर्तते।

अ.गृहस्थाः पत्न्याः अभिप्रायं स्वीकुर्वन्ति । आ.पत्न्यः नेत्राभ्यां गृहस्थानां नियन्त्रणं कुर्वन्ति ।

इ. गृहस्थाः पत्न्याः अभिप्रायं नैव स्वीकुर्वन्ति । ई.पत्न्यः गृहस्थानां वाक्यं न श्रृण्वन्ति ।

II. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. मुनयः किमर्थं हिमवतः समीपम् आगताः ?

2. हिमवान् ऋषीणाम् आगमने किम् उक्तवान् ?

3.देवर्षेः वचनं श्रुत्वा पार्वती कीदृशप्रतिक्रियां दत्तवती?

4.पुत्र्याः विवाहविषये पर्वतराजस्य निर्णय: क: ?

III.दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. कन्येयं कुलजीवितम् इति पद्यभागस्य सारांशं लिखत।

2. शिवपार्वत्योःविवाहविषये अङ्गिरस: हिमवन्तं किम् अवोचत् ?

IV. पाठनाम उल्लिख्य,श्लोकानाम् अनुवादं कन्नडभाषया, आङ्ग्लभाषया वा कुरुत ।

1. तत्र वेत्रासनासीनान् कृतासनपरिग्रहः ।
इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ॥1॥

2.एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥4॥

3. यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥9॥

4. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥12॥

5. इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ॥14॥

V. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. इत्युवाचेश्वरान्वाचं प्राञ्जलिः ............................ ।

2. अशोच्या हि पितुः कन्या ............................ प्रतिपादिता ।

3. लीला ............................ गणयामास पार्वती ।

4. प्रायेण ............................ कन्यार्थेषु कुटुम्बिनः ।

5. अर्थिनो मुनयः प्राप्तं ............................ फलं मया ।

| |
|---|
| गृहमेधि, गृहिणीनेत्राः, कमलपत्राणि, सद्भर्तुः, भूधरेश्वरः , दाराः |

VI संयोजयत ।

| क | ख |
| --- | --- |
| शम्भुः | महर्षिः |
| कविकुलगुरुः | पर्वतराजः |
| कुमारसम्भवम् | कालिदासः |
| अङ्गिरसः | महाकाव्यम् |
| मेना | उमा |
| | स्थावराणि |

# 7. ज्यौतिषिकस्य दिनम् ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. ज्यौतिषिकः कुत्र उपविश्य ग्राहकान् प्रतीक्षते ?

अ. आम्रवृक्षस्य छायायाम् । आ.वटवृक्षस्य छायायाम् ।

इ.निम्बवृक्षस्य छायायाम् । ई.नारिकेलवृक्षस्य छायायाम् ।

2. चणकान् क्रेतुं कः जनान् प्रबोधयति ?

अ.वज्रवणिक् । आ.चणकवणिक् । इ. शाकवणिक् । ई. सुवर्णवणिक् ।

3. जनाः कस्य वचनैः तुष्यन्ति ?

अ. ज्यौतिषिकस्य । आ. पथिकस्य । इ.लेखकस्य । ई. प्रेक्षकस्य ।

4. ज्यौतिषिकः ग्रामं परित्यज्य कुत्र आगतवान् ?

अ.महापत्तनम् । आ.चेन्नपत्तनम् । इ. पिरियापत्तनम् । ई. लघुपत्तनम् ।

5. पथिकस्य नामधेयं किम् ?

अ.गुरुनायकः । आ. दण्डनायकः । इ. शूरनायकः । ई. वीरनायकः ।

6. ज्यौतिषिकः कुत्र शयनमकरोत् ?

अ. देवालये । आ. वैद्यालये । इ.मार्गे । ई. कटे ।

7. यदा पान्थः धूमवर्तिकां प्रज्वालयति तदा ज्यौतिषिकः तस्य मुखं पश्यति।

तदा ज्यौतिषिकस्य भयम् अभवत् । तस्य कारणम् ----------

अ.पथिकः एकः चोरः इति चिन्तयति ।

आ. पथिकस्य मुखं क्रूरम् आसीत्।

इ. पथिकः एकः आरक्षकः स्यात् इति।

ई.सः आत्मना मारितः गुरुनायकः एव आसीत्।

8. ज्यौतिषिकः पथिकं प्रति "अद्य रात्रावेव ग्रामं गच्छतु। पुनः एतत् नगरम् आगच्छति चेत्

प्राणसङ्कटं भवति" इति वदति। सः किमर्थं तथा वदति इत्युक्ते-

अ.सः पुनः आगच्छति चेत् तस्य मतिभ्रमणं भवति।

आ.सः पुनः आगच्छति चेत् ज्योतिषिकस्य रहस्यं जानाति ।

इ.सः पुनः आगच्छति चेत् तस्य अनारोग्यं भवति।।

ई.सः पुनः आगच्छति चेत् तस्य धननाशः भवति।

9.कूपे पातितं गुरुनायकं दृष्ट्वा एषः अरक्षत् ।

अ. चणकवणिक् । आ.ज्यौतिषिकः । इ.ज्यौतिषिकस्य पत्नी । ई.पिपासितः पथिकः।

II.दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. ज्यौतिषिकस्य पूर्वजीवनवृत्तान्तं पाठानुसारेण लिखत ।
2. समयप्रज्ञाम् उपयुज्य ज्यौतिषिकः गुरुनायकं कथं वञ्चयति इति विवृणुत।
3. ज्यौतिषिक-गुरुनायकयोः मध्ये संवादः कथं प्रवृत्तः इति विवृणुत।

III. पाठनाम उल्लिख्य,'कः कं प्रति अवदत्'इति संस्कृतभाषया उत्तरं लिखत।

1. भवतः भाग्यरेखा............ ।
2. मां साग्रहं आहूतवान् त्वम् ।
3.पूर्वं भवतः प्राणसङ्कटम् आपतितम् आसीत् ।
4. मम नाम कथं जानासि ?
5.इदानीं तु निद्रासमयः ।

IV.संयोजयत ।

| क | ख |
|---|---|
| गुरुनायकः | अविनाशवर्णः |
| त्रियामा | वटवृक्षः |
| ज्यौतिषिकः | भर्जनाग्निः |
| चणकवणिक् | रात्रिः |
| विपणिमार्गः | कपर्दाः |
| | पथिकः |

# 8. सान्तःपुरः शरणागतोऽस्मि।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. गोपकन्यकाः दामोदरं वारयितुं कम् आकारयन्ति ?

अ.नन्दगोपम् । आ.वृद्धगोपालकम् । इ.सङ्कर्षणम् । ई.कालियम् ।

2. कः यमुनाह्रदं प्रविष्टः?

अ.दामोदरः। आ.सुपर्णः । इ.बलरामः । ई.अक्रूरः ।

3. वृद्धगोपालकः किम् आरुह्य यमुनाह्रदं पश्यति ?

अ.पर्वतम् । आ.कुम्भपलाशम् । इ. प्रासादम् । ई.रथम् ।

4. कस्य भयेन कालियः यमुनां प्रविशति ?

अ.कृष्णस्य । आ.बलरामस्य । इ.व्याघ्रस्य । ई.गरुडस्य ।

5. सुपर्णः कः ?

अ.काकः । आ.गरुडः। इ.चटकः । ई.पन्नगः ।

6. सर्वप्रजाभिः किं कर्तव्यः इति दामोदरः कालियं वदति ?

अ.अप्रमादः । आ.असन्तोषः । इ.अविनयः । ई.अनाचारः ।

7. दामोदरः कालियस्य फणायाम् एतत् करोति ।

अ.भरतनाट्यम् । आ.हल्लीसकम् । इ.ताण्डवनृत्यम् । ई.यक्षनृत्यम् ।

8 “मा खलु साहसं कृत्वा प्रवेष्टुम्" इति वाक्ये वृद्धगोपालकः दामोदरस्य विषये इमं भावं प्रकटयति ।

अ.प्रीतिः । आ.क्रोधः । इ. मात्सर्यम् । ई.असूया ।

9. "हन्त ! दर्शितं ते वीर्यम्" इति दामोदरवचनस्य तात्पर्यम् इदम् अस्ति ।

अ.कृष्णः किञ्चित् दग्धः। आ.कृष्णः संपूर्णतया दग्धः। इ.कृष्णः किञ्चिदपि न दग्धः। ई.कालियः दग्धः।

10.कृष्णः कालियस्य शिरसि स्वपादचिह्नं करोति,गरुडः एतत् दृष्ट्वा कालियाय किं करिष्यति?

अ.भयं प्रदास्यति । आ.अभयं प्रदास्यति । इ.वरं प्रदास्यति। ई.शापं प्रदास्यति ।

II.दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. दामोदरस्य पात्रचित्रणं पाठानुसारेण कुरुत ।
2. यमुनाह्रदस्य गाम्भीर्यं तथा वैशिष्ट्यं विवृणुत ।

3. पाठानुसारेण कालियस्य चित्रणं कुरुत ।

III. पाठनाम उल्लिख्य,'कः कं प्रति अवदत्' इति संस्कृतभाषया उत्तरं लिखत।

1. नागं मे वशं करोमि ।

2. दर्शितोऽनुरागः ।

3. अहो ! बिभेमि भर्तः बिभेमि ।

4. मा खलु साहसं कृत्वा प्रवेष्टुम् ।

5. चिह्नितं तव मूर्धनि ।

IV.मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत।

1. ................ सललितं रुचिरं वहति ।

2. मेघे स्थितः ................ इवावभाति ।

3. एष प्रसह्य सहसा भुवि ................ ।

4. अभयं ते ................ ।

| |
|---|
| शक्र, हल्लीसकम् , कालियः , प्रदास्यति, विक्षिपामि |

V.संयोजयत ।

| क | ख |
|---|---|
| कालियः | बलरामः |
| दामोदरः | देवेन्द्रः |
| सङ्कर्षणः | कृष्णः |
| आखण्डलः | नीलभुजङ्गमः |
| | पर्वतः |

# 9. सूक्तिकुसुमानि ।

I अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. अलब्धं कथम् ईहेत् ?

अ.धर्मेण । आ.द्वेषेण । इ. क्रोधेन । ई.भयेन ।

2. केषां मन: निश्चलम् ?

अ.मूर्खाणाम् । आ.धीराणाम् । इ.भीरूणाम् । ई.राक्षसानाम् ।

3. नभसोऽपि किं महत् ?

अ.जलम् । आ.कर्म । इ. वर्म । ई.ब्रह्म ।

4. कन्दै: फलै: के कालं क्षपयन्ति?

अ.मुनिवराः । आ.व्याघ्राः । इ. गजाः । ई.शुकाः ।

5. तृणैः के बलिनः भवन्ति ?

अ.अजाः । आ.बिडाला: । इ. व्याघ्राः । ई.वनगजाः ।

6. 'सन्तोष एव पुरुषस्य परं निदानम्' इति वाक्यस्य भावः सन्तोषः मानवस्य ___ ।

अ.निद्राकारणम् । आ.निन्दाकारणम् । इ. आरोग्यकारणम् । ई.दुःखकारणम् ।

7.'विद्याविहीनः पशुः' इत्यत्र सुभाषितकारस्य आशयःविद्यावान् एव ___ ।

अ.दरिद्रः । आ.मूर्खः । इ.कनिष्ठः । ई.श्रेष्ठः ।

8. 'मूर्खस्य नास्त्यौषधम्' इति वाक्ये सुभाषितकारस्य आशयः अयमस्ति ।

अ.मूर्खपूजा । आ.मूर्खप्रशंसा । इ.मूर्खनिन्दा । ई.मूर्खसेवा ।

II.द्वित्रैःवाक्यैःसंस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत।

1. सुभाषितोक्तरीत्या लोकस्थितिः कीदृशी ?

2.सतां गेहे कानि नोच्छिद्यन्ते?

3. सुभाषिते विद्या कथं प्रशंसिता ?

4. सुभाषितकार: मूर्खं कथं वर्णयति?

III. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1.चलन्ति ..........कामम् ।

2.सर्पाः ...........पिबन्ति ।

3...........निश्चलं मनः न चलति ।

4.लब्धं यत्नेन ............. ।

5. विद्या ............. पूज्यते ।

| पवनं, धीराणां, गिरयः, अब्धिः , राजसु, पालयेत् |
|---|

IV. संयोजयत ।

| क | ख |
|---|---|
| विद्या | गरीयसी |
| जलनिधिः | परादेवता |
| सन्तोषः | पुरुषः |
| आशा | आनन्दः |
| | सागरः |

V.पाठनाम उल्लिख्य, श्लोकानाम् अनुवादं कन्नडभाषया, आङ्ग्लभाषया वा कुरुत ।

1. अलब्धमीहेद् धर्मेण लब्धं यत्नेन पालयेत् ।
पालितं वर्धयेन्नित्यं वृद्धं पात्रेषु निक्षिपेत् ॥1॥

2.तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतानि तु सतां गेहे नोच्छिद्यन्ते कदाचन ॥2॥

3.गिरिर्महान् गिरेरब्धिः महानब्धेर्नभो महत् ।
नभसोऽपि महत् ब्रह्म ततोऽप्याशा गरीयसी ॥3॥

4. चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥4॥

5.पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति ।

आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥7॥

# 10.सन्मित्रम् ।

I. अधो निर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. सेनजिद्राजस्य सचिवस्य नाम किम् ?

अ.वाचिकमित्रः। आ.सोमदेवः । इ. देवव्रतः । ई.चन्द्रधरः ।

2. राजा केन यशः प्राप्नोत् ?

अ.मन्त्रिणः बुद्धिचातुर्येण ।आ.सेनापतेःपराक्रमेण । इ. पुरोहितस्य मन्त्रेण । ई.पाचकस्य पाकेन ।

3. शास्त्रालापः कुत्र प्रावर्तत ?

अ.कार्यालये । आ.स्वर्गे । इ. मित्रगृहे । ई.राजसभायाम् ।

4. महीपालस्य पूजा कुत्र संभवति ?

अ.स्वदेशे । आ.विदेशे । इ. आकाशे । ई.पाताले ।

5. देवव्रतस्य कति मित्राणि आसन् ?

अ.त्रीणि । आ.चत्वारि । इ. पञ्च । ई.षट् ।

6. सन्मित्रस्य नाम किम् ?

अ.वाचिकमित्रः । आ.सोमदेवः । इ.देवव्रतः । ई.चन्द्रधरः ।

7. सन्मित्रम् इति पाठे इदं सूचितम् अस्ति ।

अ.सुखकाले मित्रपरीक्षा । आ.कष्टकाले मित्रपरीक्षा ।

इ.विवाहकाले मित्रपरीक्षा । ई.भोजनकाले मित्रपरीक्षा ।

8. 'मित्रमेकमेव भवति प्रधानं जगतीतले' इति वाक्यस्य आशयः कः?

अ.सन्मित्रं सर्वदा साहाय्यं करोति । आ.शत्रुः सर्वदा साहाय्यं करोति ।

इ.बन्धुः सर्वदा साहाय्यं करोति । ई.सेवकः सर्वदा साहाय्यं करोति ।

9. महीपालस्य पूजा स्वदेशे सम्भवति इति मन्त्रिणः वचनस्य आशयः

अ.सचिवः श्रेष्ठः । आ.विद्वान् श्रेष्ठः । इ.सेनापतिः श्रेष्ठः। ई.पुरोहितः श्रेष्ठः ।

II. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. सेनजित्-देवव्रतयोः मध्ये प्रवृत्तं सम्भाषणं पाठानुसारेण विवृणुत ।

2.'सन्मित्रम्' इति पाठे देवव्रतः कीदृशकष्टपरम्पराम् अनुभूतवान् ? इति वर्णयत ।

3. देवव्रत-चन्द्रधरयोःमैत्रीं वर्णयत।

III.पाठनाम उल्लिख्य,'कः कं प्रति अवदत्' इति संस्कृतभाषया उत्तरं लिखत।

1. महीपालस्य पूजा स्वदेशे सम्भवति ।

2. प्रदर्श्यतां तावत् स्वविषयकं प्रामाण्यम् ।

3. नाहं विस्मरामि तवोपकारम् ।

4. मित्रमेकमेव भवति प्रधानं जगतीतले ।

5. अहो! धिङ् माम् इमौ स्वार्थिनौ सखायौ ।

6. आ: ममेदृशी प्रज्ञा ?

IV. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. राजा ससुखं सानन्दं कालं ................ ।

2. नाभिलषन्ति इतरेषामपि ................ ।

3. नूनमहं विरोधेऽपि राज्ञः ................ आचरिष्यामि ।

| भवत्साहाय्यम्, यापयति स्म, विवृद्धः , कल्याणम् |
|---|

IV. संयोजयत ।

| क | ख |
|---|---|
| वैशाली | राजा |
| सेनजित् | सर्वत्र पूज्यते |
| देवव्रतः | स्वदेशे भवति |
| विद्वान् | अमात्यः |
| महीपालस्य पूजा | वाचिकमित्रः |
| | पुरी |

# 11. वचनामृतम् ।

I.द्वित्रैःवाक्यैःसंस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत।

1. अन्तरङ्गशुद्धि -बहिरङ्गशुद्ध्योः विषये बसवण्णस्य अभिप्रायः ।
2. कूडलसङ्गमप्रसादनस्य पद्धति : का ?
3. अल्लमप्रभुः सम्बन्धस्य वैचित्र्यं कथं वर्णयति?
4. अक्कमहादेवी ' ज्ञान-भक्त्योः ' अविनाभावसम्बन्धं कथं वर्णयति ?

II. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. मा चोरय मा................मा कथयासत्यम् ।
2. ................ अपेक्ष्यते सकलेष्वपि प्राणिषु ।
3. अन्नदाने ................अस्ति ।
4. कुत्रत्योः रसालः? कुत्रत्यः ................ ?

| |
|---|
| दयैव, पुण्यम्, कोकिलः, मुक्तः, मारय |

III. संयोजयत ।

| क | ख |
|---|---|
| बसवण्णः | गुहेश्वरलिङ्गः |
| अल्लमप्रभुः | चेन्नमल्लिकार्जुनः |
| अक्कमहादेवी | नास्ति |
| आचारः | धर्मस्य मूलम् |
| दया | स्वर्गः |
| | कूडलसङ्गमदेवः |

# 12. कन्नडकण्वः।

I. अधो निर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत ।

1. श्रीमहोदयस्य माता का ?

अ.रुद्रम्मा । आ.भागीरथम्मा । इ. नागम्मा । ई.सावित्रम्मा ।

2. श्रीमहोदयस्य शिष्येषु एकस्य नाम लिखत ।

अ.द रा. बेन्द्रे । आ.यु आर् अनन्तमूर्तिः । इ. कुवेम्पु । ई.वि. कृ. गोकाक् ।

3. मैसूरु महाराजः तं केन उपाधिना सममानयत् ?

अ.विद्यासेवासक्तः । आ.क्रीडासेवासक्तः। इ.राजसेवासक्तः । ई.कृषिसेवासक्तः ।

4. श्री महोदयस्य कन्नडकण्वः इति नाम केन सूचितम् ?

अ.मास्ति वेङ्कटेश अय्यङ्गार्य महोदयेन । आ.ए. एन्. मूर्तिरावमहोदयेन ।

इ. मेकेन्टिष् महोदयेन । ई.डि. वि. जि. महोदयेन ।

5.प्रो.मेकेण्टिष् महोदयः एवम् उद्गिरति "श्रीः तस्य गतजन्मनि आक्स्फर्ड् विश्वविद्यालयस्य

आङ्ग्लभाषाप्राध्यापकः एव स्यात्" इति। अस्य वाक्यस्य आशयः अयम् अस्ति।

अ.श्रीः आङ्ग्लभाषायां निपुणः आसीत् । आ.श्रीः आङ्ग्लभाषायां निपुणः न आसीत्। इ.श्रीः कन्नडभाषायां निपुणः आसीत्। ई. श्रीः आक्स्फर्ड् नगरे वसति स्म।

6.1928 तमे वर्षे प्रवृत्ते कलबुर्गी कन्नडसाहित्यसम्मेलने श्रीः कुवेम्पुमहोदयं वेदिकामाहूय तस्य कण्ठे

पुष्पमालिकां धारयित्वा आनन्दितः अभवत्। इदं तस्य ------ सूचयति।

अ.भाषणशक्तिम् । आ.शिष्यवात्सल्यम् । इ.असूयाम् । ई.क्रोधम् ।

7.एतत् श्री महोदयस्य कृतिषु न अन्तर्भवति।

अ.इङ्ग्लीष् गीतेगळु । आ.होङ्गनसु । इ. गदायुद्धनाटकम् । ई.यमनसोलु ।

II.द्वित्रैःवाक्यैःसंस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत।

1. श्री महोदयस्य बाल्यम् ।

2. श्री महोदयस्य शिष्यवात्सल्यम् ।

3. श्री महोदयस्य कृतयः ।

III.दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. श्री महोदयस्य कन्नडसेवामधिकृत्य लघुप्रबन्धं लिखत ।

2. श्री महोदयस्य आदर्शमयं जीवनमधिकृत्य लघुप्रबन्धं लिखत ।

IV. संयोजयत ।

| क | ख |
|---|---|
| होङ्गनसु | राजसेवासक्तः |
| मैलारय्यः | राष्ट्रकविः |
| श्रीमहोदयस्य बाल्यम् | बि.एम्. श्री |
| कुवेम्पु | भागीरथम्मा |
| मैसुरुमहाराजः | द.रा.बेन्द्रे |
| | श्रीरङ्गपत्तने |

# 13. विज्ञानपथः ।

I. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत ।

1. भारतदेशे विज्ञानस्य प्रगतिम् अधिकृत्य लघुप्रबन्धं लिखत ।
2. 'भारते गणितशास्त्रं खगोलशास्त्रं च कथम् उन्नतिं नीते' इति विशदयत ।
3. जीवविज्ञानं परिसरविज्ञानं च अधिकृत्य लघुटिप्पण्यौ रचयत।

II. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. वेदेष्वेव सौरमण्डले स्थितानां............. ग्रहाणाम् उल्लेखं पश्यामः ।
2. अद्य आप्रपञ्चम् उपयुज्यमानाः संख्याः ................ च भारतीययोगदानम् ।
3. अश्वशास्त्रम्, ............ चोद्दिश्य स्वतन्त्रतया ग्रन्था विरचिताः ।

| |
|---|
| दशमानपद्धतिः, गजशास्त्रं , दल्वनः , दश |

III. संयोजयत ।

| क | ख |
|---|---|
| भूमिः | कक्षापुटतन्त्रम् |
| आर्यभटः | लीलावती |
| चरकसंहिता | यज्ञकुण्डम् |
| नागार्जुनः | आयुर्वेदग्रन्थः |
| भास्कराचार्यः | आर्यभटीयम् |
| | गुरुत्वाकर्षणम् |

# अभ्यासपुस्तकम्

## १.द्वे विद्ये वेदितव्ये ।

१. सन्धिं विभजत।

तत्रापरा=

यथोर्णनाभिः=

चैव=

२.सन्धिं योजयत।

ह+उवाच=

विधिवत्+उपसन्नः=

भवति+इति=

३.विग्रहवाक्यं लिखत।

अवर्णम्=

विधिवत्=

ज्येष्ठपुत्रः=

४.समस्तपदं लिखत।

न विद्यते पाणी च पादौ च यस्य तत्=

न विद्यते गोत्रं यस्य तत्=

भूतानां योनिः=

५.पदपरिचयं कुरुत।

अथ=

अधिगम्य=

इति=

६.समानार्थकपदं लिखत।

पुत्रः=

ब्रह्मा=

ऊर्णनाभिः=

७.विरुद्धपदं लिखत ।

अक्षरम् X

ज्येष्ठः X

नित्यम् X

## २.आदर्शगुणाः।

१. सन्धिं विभजत।

नाविजित्य=

पुत्रेष्वग्निषु=

देवासुरः=

२.सन्धिं योजयत।

स्वजनवत्+नित्यम्=

सम्यक्+योक्ता=

राग+उपहतः=

३.विग्रहवाक्यं लिखत।

नियतात्मा=

धर्मोपदेशकः=

लोकप्रियः=

४.समस्तपदं लिखत।

स्थिरं चित्तं यस्य सः=

कम्बु इव ग्रीवः यस्य सः=

देवश्च असुरश्च मनुष्यश्च=

५.पदपरिचयं कुरुत।

गत्वा=

अविजित्य=

श्रुतः=

६.समानार्थकपदं लिखत।

निष्ठितः=

वासवः=

सौमित्रिः=

७.विरुद्धपदं लिखत।

प्रियवादी=

आर्यः=

सर्वज्ञः=

## ३.विवादः विनाशाय ।

१. सन्धिं विभजत।

अहिंसैव=

द्वावपि=

बहून्यहानि=

२.सन्धिं योजयत।

तौ+अनुप्रस्थितः=

यावत्+निशासमये=

देव+ऋषिः=

३.विग्रहवाक्यं लिखत।

अनित्यानि=

यूकमत्कुणदंशाः=

दंष्ट्राक्रकचेन=

४.समस्तपदं लिखत।

पीवरा तनुः यस्य सः=

स्वस्य देशे=

स्मृतीनां पाठकः=

५.पदपरिचयं कुरुत।

आसाद्य=

मुक्त्वा=

चिन्तितम्=

६.समानार्थकपदं लिखत।

सूर्यः=

मार्जारः=

वायसः=

७.विरुद्धपदं लिखत।

अहिंसा X

नित्यानि X

असारः X

# ४.सत्त्वपरीक्षा ।

१. सन्धिं विभजत।

ममानुकम्पया=

तुल्योऽहम्=

कस्त्वम्=

२.सन्धिं योजयत।

बल+उन्मत्तः

तत्+इच्छामि=

तु+एतत्=

३.विग्रहवाक्यं लिखत।

खिन्नगात्रः=

मकरालयम्=

महावीर्यः=

४.समस्तपदं लिखत

बलेन उन्मत्तः=

महान् च असौ कपिः च=

विवृत्ते अक्षिणी यस्य सः=

५.पदपरिचयं कुरुत।

विज्ञाय=

निरीक्षितुम्=

जातः=

६.समानार्थकपदं लिखत।

हनुमान्=

पर्वतः=

अर्कः=

७.विरुद्धपदं लिखत ।

प्रियम् X

वामः X

दुरुक्तम् X

## ५.महर्षिवचनपालनम् ।

१. सन्धिं विभजत।

सन्ध्येव=

पुनरपि=

प्रसादाल्लेभे=

२.सन्धिं योजयत।

गाध+इतरः=

एतत्+आकर्ण्य=

पिशित+अशनः=

३.विग्रहवाक्यं लिखत।

गाधिनन्दनः=

प्रतिष्ठापितधृतिः=

कौसल्याजानिः=

४.समस्तपदं लिखत।

विधिम् अनतिक्रम्य=

वीराणां पानम्=

कर्णयोः परुषम्=

५.पदपरिचयं कुरुत।

आकर्ण्य=

विधातुम्=

क्रीडत्=

६.समानार्थकपदं लिखत।

विश्वामित्रः=

क्रतुः=

यातुधानः=

७.विरुद्धपदं लिखत ।

स्वाधीनः X

पर्याप्तम् X

मित्रम् X

# ६.कन्येयं कुलजीवितम् ।

१. सन्धिं विभजत।

भूधरेश्वरः

स्याच्चेत्

येनात्र

२.सन्धिं योजयत।

द्वयेन+एव=

कन्या+इयम्=

भिक्षा+असि=

३.विग्रहवाक्यं लिखत।

कुलजीवितम्=

सप्तर्षयः=

विश्वात्मा=

४.समस्तपदं लिखत।

सद्भर्त्रे प्रतिपादिता=

न अन्यवन्दिनः=

गृहिणी एव नेत्रं येषां ते=

५.पदपरिचयं कुरुत।

योक्तुम्=

अलम्=

कर्तव्यम्=

६.समानार्थकपदं लिखत।

भारती=

दुहिता=

शिवः=

७.विरुद्धपदं लिखत ।

स्थावरम् X

उत्तमम् X

आस्था X

## ७.ज्यौतिषिकस्य दिनम् ।

१. सन्धिं विभजत।

भोजनानन्तरम्=

यावज्ज्यौतिषिकेण=

श्रान्तोऽसि=

२.सन्धिं योजयत।

मा+अस्तु=

भर्जन+अग्निः=

ईषत्+अकम्पत=

३.विग्रहवाक्यं लिखत।

कार्यक्षेत्रम्=

अनन्यगतिः=

महापापम्=

४.समस्तपदं लिखत।

भाग्यस्य लेखम्=

क्रोधेन आविष्टः=

वट इति वृक्षः=

५.पदपरिचयं कुरुत।

प्रवृत्ता=

उत्थातुम्=

प्रयतमानः=

६.समानार्थकपदं लिखत।

गृहम्=

वृक्षः=

मुखम्=

७.विरुद्धपदं लिखत ।

परलोकः X

अन्धकारः X

दिवा X

## ८.सान्तःपुरः शरणागतोऽस्मि ।

१. सन्धिं विभजत।

ममैकः=

इवावभाति=

यच्च=

२.सन्धिं योजयत।

सो+अहम्=

प्रजासु+अप्रमादः=

सित+इतरः=

३.विग्रहवाक्यं लिखत।

सान्तः पुरः=

शर्वधनुः=

महोरगः=

४.समस्तपदं लिखत।

नीलश्चासौ भुजङ्गमश्च=

यादसां निधिः=

भुवनस्य आभोगः=

५.पदपरिचयं कुरुत।

प्रवेष्टुम्=

उत्थितः=

परिगृह्य=

६.समानार्थकपदं लिखत।

सङ्कर्षणः=

आखण्डलः=

सुपर्णः=

७.विरुद्धपदं लिखत ।

कृशः X

विषम् X

सितम् X

# ९.सूक्तिकुसुमानि ।

१. सन्धिं विभजत।

नभसोऽपि=

अप्याशा=

विद्वज्जनः=

२.सन्धिं योजयत।

चलति+एव=

पापात्+निवारयति=

सर्वस्य+औषधम्=

३.विग्रहवाक्यं लिखत।

सूर्यातपः=

विद्याविहीनः=

गोगर्धभौ=

४.समस्तपदं लिखत।

मुनीनां वरः=

निशितः च अङ्कुशः च=

शास्त्रेषु विहितम्=

५.पदपरिचयं कुरुत।

वारयितुम्=

विज्ञेयः=

गतम्=

६.समानार्थकपदं लिखत।

नभः=

अब्धिः=

पवनः=

७.विरुद्धपदं लिखत ।

अलब्धम् X

दुर्बलः X

निन्दा X

# १०.सन्मित्रम् ।

१. सन्धिं विभजत।

सन्मित्रम्=

सेनजिदस्मिन्=

यद्यपि=

२.सन्धिं योजयत।

तव+उपकारः=

धिक्+माम्=

विचारयन्+एव=

३.विग्रहवाक्यं लिखत।

राजद्रोहः=

महदौदार्यम्=

अविलम्बेन=

४.समस्तपदं लिखत।

प्राणानाम् अर्पणम्=

अर्घ्यं च पाद्यं च=

आदरेण सहितम्=

५.पदपरिचयं कुरुत।

त्यक्त्वा=

विहाय=

बाढम्=

६.समानार्थकपदं लिखत।

विद्वान्=

मन्त्री=

यशः=

७.विरुद्धपदं लिखत ।

प्राची X

स्वदेशः X

सुखम् X

# भाषान्तरपाठः।

<u>**संस्कृतभाषया अनुवदत**</u>

**1**.ಕಾಶಿಯಲ್ಲಿ ಒಬ್ಬ ವಿದ್ವಾಂಸನಿದ್ದನು.

There lived a scholar in Kashi.

**2**.ಮರದಿಂದ ಹಣ್ಣು ಕೆಳಗೆ ಬೀಳುತ್ತದೆ.

A fruit falls from the tree.

**3**.ರಾಜನು ಕವಿಗಳನ್ನು ಸನ್ಮಾನಿಸುತ್ತಾನೆ.

The king honors  the poets.

**4**.ಜಗತ್ತಿಗೇ ತಾಯಿ ತಂದೆಗಳಾದ ಪಾರ್ವತಿ ಪರಮೇಶ್ವರರನ್ನು ನಮಿಸುತ್ತೇನೆ.

I prostrate goddess Parvati & lord Parameshvara,who are the parents of the universe.

**5**.ವಾಲ್ಮೀಕಿ ಮಹರ್ಷಿಗಳು ರಾಮಾಯಣವನ್ನು ರಚಿಸಿದರು.

The great sage Valmiki composed Ramayana.

**6**.ಶಂಕರಾಚಾರ್ಯರು ವೇದಧರ್ಮವನ್ನು ಭಾರತದಲ್ಲಿ ಹರಡಿದರು.

Shankaracharya propagated veda dharma in India.

**7**.ದೇವರ ಅನುಗ್ರಹದಿಂದ ಮೂಕನೂ ಮಾತನಾಡುವನು.

Even a dumb person can speak by the grace of God.

**8**.ನೀನು ಏನು ಮಾಡುತ್ತಿರುವೆ ?

What are you doing there?

**9**.ಗಂಗಾನದಿಯು ಹಿಮಾಲಯಪರ್ವತದಿಂದ ಹರಿಯುತ್ತದೆ.

The river Ganga flows from Himalayan Mountains.

**10**.ಕಪಿಯು ಮರವನ್ನು ಹತ್ತುತ್ತದೆ.

A monkey climbs a tree.

**11**.ಈ ಮಾವಿನ ಹಣ್ಣುಗಳು ಬಹಳ ಸಿಹಿಯಾಗಿವೆ.

These mango fruits are very sweet.

**12**.ಭಗವಂತನಲ್ಲಿ  ದೃಢವಾದ  ಭಕ್ತಿ ಇರಲಿ.

We should have firm devotion in the Almighty.

**13**.ಮಕ್ಕಳು ಉದ್ಯಾನವನದಲ್ಲಿ ಆಟವಾಡುತ್ತಾರೆ.

The children play in the garden.

**14.**ವನ್ಯ ಮೃಗಗಳು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ.

The wild animals live in the forest.

**15.**ನಾವು ಇತರರ ಸೇವೆಗಾಗಿ ಬದುಕಬೇಕು.

We should live to serve others.

**16**.ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರಶ್ನೋತ್ತರವನ್ನು ಬರೆಯುತ್ತಿದ್ದಾರೆ.

The students are writing the question and answer.

**17**.ನಾಳೆ ನನ್ನ ತಂದೆಯು ನಗರಕ್ಕೆ ಬರುವರು.

My father is coming to the city tomorrow.

**18**.ತಾಯಿ ಮತ್ತು  ತಾಯ್ನಾಡು ಸ್ವರ್ಗಕ್ಕಿಂತಲೂ ದೊಡ್ಡದು.

Mother and Motherland are greater than heaven.

**19**.ಭಾರತವು ವಿಶ್ವಶಾಂತಿಗಾಗಿ ಪ್ರಯತ್ನಿಸುತ್ತದೆ.

India vows global peace.

**20**.ಸಂಸ್ಕೃತ ಭಾಷೆಯ ಇನ್ನೊಂದು ಹೆಸರು ಗೀರ್ವಾಣವಾಣಿಯೆಂದು.

The other name of Sanskrit language is Girvanavani.

# अर्थग्रहणम् । (अभ्यासार्थमेव )

परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

१.पातालस्य राजा बलिः महान् भगवद्भक्तः आसीत्। कदाचित् कृष्णः युधिष्ठिरेण सह तस्य प्रासादम् अगच्छत्। दैत्यानां राजा कृष्णं सत्कृत्य 'अयमपरः महाशयः कः' इति अपृच्छत्। तदा भगवान् –'अयं भारतदेशस्य महाचक्रवर्ती युधिष्ठिरः, भूलोके महादाता च। अस्य प्रासादात् न कोऽपि याचकः निराशः गच्छति' इति अवदत्। बलिः इदं श्रुत्वा हसित्वा –'स्वामिन्, यदा अहं राजा आसं तदा भिक्षुकः एव नासीत्' इति विज्ञापयामास।

प्रश्नाः १.बलिः कीदृशः आसीत् ?

२.कृष्णः केन सह प्रासादम् अगच्छत् ?

३.कृष्णं सत्कृत्य बलिः किमपृच्छत् ?

४.बलिः हसित्वा किं विज्ञापयामास ?

२.आसीत् कश्चित् बालकः। सः एकम् आरामं गत्वा तत्र एकस्मिन् आम्रवृक्षे मनोहरं फलं दृष्ट्वा तत् अपचेतुम् ऐच्छत्। परन्तु तं वृक्षं परितः बहवः कण्टकिनः गुल्माः आसन्। तेभ्यः भीत्वा फलम् अनपचित्य गृहं गतः। तदा अन्यः बालकः तत् फलं दृष्ट्वा परिगतेभ्यः कण्टकिभ्यः गुल्मेभ्यः अभीत्वा वृक्षम् आरुह्य फलमपचित्य भक्षयामास। अतः धैर्यवतो भाग्यम् उपैति।

प्रश्नाः १.बालकः आरामं गत्वा किं कर्तुम् ऐच्छत्?

२.वृक्षं परितः के आसन्?

३.गुल्मेभ्यः भीतः बालकः किम् अकरोत्?

४.अन्यः बालकः वृक्षमारुह्य किं चकार?

३.क्रीडाङ्गणे बालकाः कन्दुकेन क्रीडन्ति।कन्दुकः चर्मणा निर्मितः।वातेन पूरितश्च । अतः यदि सः ताड्यते तर्हि सः उत्पतति । ते बालकाः इतस्ततः धावन्ति। बालकाः पादेन कन्दुकं ताडयन्ति। एकः बालकः भूमौ उपविष्टः। सः बहुकालं क्रीडनेन श्रान्तः। सः किञ्चित्कालं विश्रम्य पुनः क्रीडिष्यति। यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न भविष्यति। तदा एते बालकाः गृहं गमिष्यन्ति।

प्रश्नाः १.कन्दुकः केन निर्मितः ?

२.बालकाः केन कन्दुकं ताडयन्ति ?

३.एकः बालकः कुत्र उपविष्टः?

४.कदा प्रकाशः न भविष्यति ?

४.चाणक्यः चन्द्रगुप्तमौर्यस्य मन्त्री आसीत् । सः एकस्मिन् उटजे वसति स्म । राजा दरिद्रेभ्यः दातुं कम्बलानि दत्तवानासीत् । चोराः केचन कम्बलानि अपहर्तुम् उटजमागताः । शीतकालेऽपि चाणक्यः कम्बलं विनैव भूमौ सुप्तः आसीत् । चकिताः चोराः तम् अपृच्छन् - अत्यन्तं शैत्यमस्ति , अत्रैवकम्बलानि सन्ति । तथापि त्वं किमर्थं कम्बलं विना शयनं करोषि ? इति । तदा चाणक्यः दरिद्रेभ्यःदातुं राजा दत्तवान् , एतानि मम कृते न इत्यवदत् । तदा अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चिन्तयन्तः चोरा अपि सज्जना अभवन् ।

प्रश्नाः १. चाणक्यः कस्य मन्त्री आसीत् ?

२. चाणक्यःकुत्र वसति स्म?

३. राजा किमर्थं कम्बलानि दत्तवान् ?

४. अधर्मः कः इति चोराणाम् आशयः ?

५.कुचेलः इति कश्चित् द्विजःकृष्णस्य मित्रम् आसीत्। सःदरिद्रःआसीत् । एकदा सःकृष्णदर्शनार्थं द्वारकाम् अगच्छत् । तं दृष्ट्वा कृष्णःअतीव अतुष्यत् । सः कुचेलं गन्धमाल्यादिभिः आराधयत् अपृच्छत् च "भो मित्र, भवता किम् आनीतम् ? इति । कुचेलः लज्जमानः एव पृथुकान् समर्पितवान् । तेनैव कृष्णः तुष्टः तस्मै समस्तसम्पदादिकम् अयच्छत् । कृष्ण-कुचेलयोः मैत्री अतीवमधुरा आसीत् ।

प्रश्नाः १.कुचेलः कस्य मित्रम् ?

२.कुचेलः किमर्थं द्वारकाम् अगच्छत्? .

३.कुचेलः कृष्णाय किं समर्पितवान् ? .

४. कृष्ण-कुचेलयोः मैत्री कीदृशी आसीत्?